1 A reads it thus—शस्यपूर्णा भवेत् पृथ्वी राजा संवत्सरे विधुः ।
B reads—यस्मिन्नब्दे विधु राजा शस्यपूर्णा च मेदिनी ।

2 B reads the line thus – नैरुज्यं च सुवृष्टिश्च सुभिक्षं क्षितिमण्डले । A reads—प्लवते चाधिकं वारि पृथिवीं नात्र संशयः । C reads—पूर्यते चाधिकं वारि कुर्यादन्योन्यघातनम् ।

3-4 A संग्रामो वातवृष्टिश्च रोगोपद्रव एव च ।
यस्मिन्नब्दे नृपो मन्दः सर्वशस्या च मेदिनी ॥
[ 'Manda' denotes 'Saturn' whose influence is des ribed below. Here one naturally expects the influence of Mars ].
B यस्मिन्नब्दे कुजो राजा सर्वशून्या च मेदिनी ।
नैरुज्यं सुप्रचारश्च दुर्भिक्षं क्षितिमण्डले ॥
[ The effects, described in the same verse, are self-contradictory. ]
D संग्रामो वा भवेद्वृष्टिं ( वृष्टिः ? ) राज्योपद्रव एव च ।
वर्षाधिपो महीपुत्रः कुर्यादन्योन्यघातनम् ॥

5-6 A कुर्यात् शस्यवतीं पृथ्वीं नैरुज्यं सर्वमानवे ।
यस्मिन्नब्दे बुधो राजा वसुधा धर्मशालिनी ॥
B यत्राब्दे चन्द्रजो राजा सर्वशस्या च भूर्भवेत् ।
धर्मे स्थितिर्मनःस्थैर्यं वृष्टिकारणमुत्तमम् ॥
D नैरुज्यमुपचारं च सुवृष्टिं क्षितिमण्डले ।
यस्मिन्नब्दे बुधो राजा शस्यलाभं विनिर्दिशेत् ॥

धर्मस्थितिर्मनःस्थैर्यं वृष्टिकारणमुत्तमम् ।
यस्मिन्नब्दे गुरू राजा सर्वा वसुमती मही ॥१९॥
नृपाणां वर्धनं नित्यं धनधान्यादिकं फलम् ।
राजा दैत्यगुरुः कुर्यात् सर्वशस्यं रसातलम् ॥२०॥
संग्रामो वातवृष्टिश्च रोगोपद्रव एव च ।
मन्दावृष्टिः सदा वातो नृपे संवत्सरे शनौ ॥२१॥
यथा वृष्टिफलं प्रोक्तं वत्सरग्रहभूपतौ ।
तद्वद्वृष्टिफलं ज्ञेयं विज्ञैर्वत्सरमन्त्रिणि ॥२२॥

1-2 A नैरुज्यं सुप्रचारश्च सुभिक्षं क्षितिमण्डले ।
यस्मिन्नब्दे गुरु राजा सर्वशस्यान्विता क्षितिः ॥
B यत्राब्दे च गुरू राजा सर्वा रसवती मही ।
नृपाणां वर्धनं नित्यं धनधान्यादिकं फलम् ॥
D नृपः श्रीवर्धनं नित्यं धनधान्यसमाकुलम् ।
संवत्सराधिपो जीवः सुभिक्षं कुरुते सदा ॥
3-4 A धर्मस्थितिः सदा वृष्टिर्मनुष्या नीरुजस्तथा ।
यस्मिन्नब्दे भृगु राजा सर्वशस्या च मेदिनी ॥
B राजा दैत्यगुरुः कुर्यात् सर्वशस्यं धरातलम् ।
संग्रामो वातवृष्टिश्च रोगोपद्रव एव च ॥
D धर्मान्वितं मनःस्थैर्यं वृष्टिकारकमुत्तमम् ।
राजा दैत्यगुरुः कुर्यात सर्वसम्पतकरं भुवि ॥
5-6 D वृष्टिहानिं प्रजापीडां ... ... ... ... (?)
अग्निभयं च सन्तापं राजा संवत्सरे शनिः ॥
5 is omitted by B.
6 B यस्मिन्नब्दे शनी राजा भवेत् संवत्सरोऽशुभः ।
B, D राजा संवत्सरे शनिः for नृपे ... ... शनौ ।
7 B वत्सरे for वत्सर । D वत्सरस्य धराधिपैः for वत्सर···पतौ
8 A reads—तथैव हि गुणं वाच्यं फलं सर्वत्र मन्त्रिणि । B तथा for तद्वत् ।
D राज्ञां वत्सरमन्त्रिणां for विज्ञै ... मन्त्रिणि ।

अथ मेघानयनम्—

शकाब्दं वह्निसंयुक्तं वेदभागसमाहृतम् ।
शेषं मेघं विजानीयादावर्तादि यथाक्रमम् ॥२३॥
आवर्तश्चैव संवर्तः पुष्करो द्रोण एव च ।
चत्वारो जलदाः प्रोक्ता आवर्तादि यथाक्रमम् ॥२४॥
एकदेशेन चावर्तः संवर्तः सर्वतो जलम् ।
पुष्करे दुष्करं वारि द्रोणे बहुजला मही ॥२५॥

अथ जलाढकनिर्णयः—

शतयोजनविस्तीर्णं त्रिंशद्योजनमुच्छ्रितम् ।
आढकस्य भवेन्मानं मुनिभिः परिकीर्तितम् ॥२६॥

1 A omits अथ, and D the entire line.

2 B शाकं for शकाब्दं, वेदेन भागमाहृतम् for वेद...तम् ।

3 A, C क्रमेण च for यथाक्रमम् ।

5 A एते for प्रोक्ता ।
B आवर्ताद्या मनीषिभिः for आवर्तादि यथाक्रमम् ।

6 B चावर्ते for चावर्तः, संवर्ते for संवर्तः ।
C reads—अतिवृष्टिस्तु संवर्ते आवर्ते निर्जलं भवेत् ।

7 C reads—पुष्करे दुष्करा वृष्टिर्द्रोणो बहुजलप्रदः ।

7-8 Between these lines, C reads—

आवर्तो दशमेघेशः संवर्तः षोडशान्वितः ।
पुष्करोऽष्टादशाधीशो द्रोणश्चाप्येकविंशतेः ॥

8 A अथाढकलक्षणम् । B अथ जलाढकनिर्णयकथनम् ।
D omits the line.

9 C आयतं for उच्छ्रितं ।
D विंशत् (an obvious error) for त्रिंशत् ।

9-10 Attributed to Varāha by Raghunandana in *Jyotistattva* (*Smṛti-tattva*, i. p. 701) with त्रिंशद्योजनविस्तीर्णं शतयोजनमायतम् for line 9.

युग्माजगोमत्स्यगते शशाङ्के
रविर्यदा कर्कटकं प्रयाति ।
जलं शताढं हरिकार्मुकेऽर्द्धं
वदन्ति कन्यामृगयोरशीतिम् ॥२७॥
कुलीरकुम्भालितुलाभिधाने
जलाढकं षण्णवतिं वदन्ति ।
अनेन मानेन तु वत्सरस्य
निरूप्य नीरं कृषिकर्म कार्यम् ॥२८॥
समुद्रे दशभागांश्च षड्भागानपि पर्वते ।
पृथिव्यां चतुरो भागान् सदा वर्षति वासवः ॥२९॥

1 B, C मीन for मत्स्य ।

3 B शताढकं कं for जलं शताढं ।

4 A, D युक्तं तु ( D च ) कन्यामृगयोरशीतिः ।

5 A ०धानैः for ०धाने ।

1-6 Attributed by Raghunandana to Varāha in *Jyotistattva* (*Smṛti-tattva*, I. p. 701) with मीन for मत्स्य, तुले शशाङ्के for यु... ने, षड्भिश्च युक्तां नवतिं वदन्ति for line 6.

7 D चतुर्वत्सरस्य (the च, offending the metre, is clearly an error) for तु वत्सरस्य ।

8 A सर्वं for नीरं ।
C निरूपणीयं for निरूप्य नीरं ।
D कृषिकार्यमुक्तं for कृषिकर्म कार्यम् ।

9 C शत for दश, भागांश्चापि for भागानपि, D भागांश्चापि ।

10 C सम्यग् for सदा ।

9-10 Attributed by Raghunandana to Varāha in *Jyotistattva* (*Smṛti-tattva*, I. p. 701), with ०भागाःस्युः for ०भागांश्च, भागांश्चापि for भागानपि ।

अथ पौषवृष्टिज्ञानम्—

सार्द्धं दिनद्वयं मानं कृत्वा पौषादिना बुधः।
गणयेन्मासिकीं वृष्टिमवृष्टिं वानिलक्रमात् ॥३०॥
सौम्यवारुणयोर्वृष्टिरवृष्टिः पूर्वयाम्ययोः।
निर्वाते वृष्टिहानिः स्यात् संकुले संकुलं जलम् ॥३१॥
एकैकं पञ्चदण्डेन मासस्य दिवसो मतः।
पूर्वार्द्धे वासरी वृष्टिरुत्तरार्द्धे च नैशिकी ॥३२॥

1 A पौषस्य ( C पौषमासीय ) for पौष, B reads—अथ पौषादिमासीयवृष्टि-लक्षणम्। Before this line, D reads—अतो विंशतिभागिका वृष्टिरिति नृपतिमन्त्रिणो आढकसलिलज्ञानम्, and C reads as follows:—

अथ सर्पानयनम्

शाकं रसाग्निसंयुक्तमष्टभिर्भागशेषितम्। अनन्ताद्याः क्रमेणैव नागा अष्टौ प्रकीर्तिताः॥

अथ वातानयम्

शाकं शशाङ्कसंयुक्तं मुनिभिर्भागमाहरेत्। आवहाद्याः क्रमाच्छेषे सप्तवाताः प्रकीर्तिताः॥
आवहः प्रवहश्चैव संवहो निवहस्तथा। उद्वहो विवहो वायुः सप्तवाताः प्रकीर्तिताः॥

अथ समुद्रानयनम्

शाकं वेदसमायुक्तं पर्वतेन समाहृतम्।
शेषमब्धिं विजानीयाल्लवणाद्यं यथाक्रमम्॥
लवणेक्षुसुरासर्पिर्दधिदुग्धजलान्तकाः।
एते स्युः सिन्धवः काले जलाधाराः प्रकीर्तिताः॥

2 A सार्द्धद्वयदिनं for सार्द्धं…द्वयं, पौषादिनां विधेर्बुधः for मानं…बुधः। C transposes मानं कृत्वा।

3 A omits वा।

2-3 This verse, with सार्द्ध for सार्द्धं, कृत्वापौषे for मानंकृत्वा, कालिकीं for मासिकीं, is attributed to Varāha in the *Jyotistattva* (p. 701).

5 C निवाते for निर्वाते।

6 D याम्यस्य for मासस्य।

7 A अपरार्द्धे for उत्तरार्द्धे। D तु for च।

दत्त्वा दण्डे पताकां तु वातस्यानुक्रमेण च ।
विज्ञेया मासिकी वृष्टिः कृत्वा यत्नमहर्निशम् ॥३३॥
धूलीभिरेव धवलीकृतमन्तरिक्षं
विद्युच्छटाच्छुरितवारुणदिग्विभागम् ।
पौषे यदा भवति मासि सिते च पक्षे
तोयेन तत्र सकला प्लवते धरित्री ॥३४॥
पौषे मासि यदा वृष्टिः कुज्झटिर्वा यदा भवेत् ।
तदादौ सप्तमे मासि वारिपूर्णा भवेन्मही ॥३५॥
यदा पौषे सिते पक्षे नभो मेघावृतं भवेत् ।
तोयावृता धरित्री न भवेत् संवत्सरे तदा ॥३६॥
मीनवृश्चिकयोर्मध्ये यदि वर्षति वासवः ।
तदादौ सप्तमे मासि तत्तिथौ प्लवते मही ॥३७॥

अथ माघवृष्टिज्ञानम्—

माघस्य सितसप्तम्यां वृष्टिर्वा मेघदर्शनम् ।
तदा संवत्सरो धन्यः सर्वशस्यफलप्रदः ॥३८॥

1 A, C दण्डपताकासु for दण्डे...तु ।
2 C ज्ञेया तु for विज्ञेया । A चित्तं समाहितं for यत्न···निशम् ।
B दृष्ट्वा वातं दिवानिशं for कृत्वा...निशम् ।
3 A, C धरणी for धवली । D—portion after एव corrupt.
4 A चकित for छुरित । C स्फुरति वारुणादिग्विभागे for छुरित...विभागम् ।
6 C reads the line thus—तोयाचला भवति वै सकला धरित्री ।
D शस्य for तत्र ।
7 A भवेद्यदि for यदा भवेत् । C पौषे यदि भ्रुवा वृष्टिः for पौषे...वृष्टिः ।
8 A तस्यैव for तदादौ । B तां तिथिं प्राप्यते मही for वारि...मही ।
7-8 Omitted by D.
9-10 Not found in A, B, D.
11 Not found in B, D. C यो च for यदि ।
12 A तस्यैव for तदादौ । C तां तिथिं प्राप्यते मही for तत्तिथौ···मही ।
12-13 Bet. these lines, C reads:—
मासि पौषे त्वमावस्या रविसौरिकुजे यदि ।
तदा महार्घ्यता ज्ञेया अन्यैर्वोरैस्तु मृत्समा ॥
13 D माघे for माघ । B omits the line.

माघे बहुलसप्तम्यां तथैव फाल्गुनस्य च ।
चैत्रे शुक्लतृतीयायां वैशाखे प्रथमेऽहनि ॥३९॥
एतासु चण्डवातो वा तड़िद्वृष्टिरथापि वा ।
तदा स्याच्छोभना प्रावृड् भवेत् शस्यवती मही ॥४०॥
सप्तम्यां स्वातियोगे यदि पतति जलं माघपक्षेऽन्धकारे
वायुर्वा चण्डवेगः सजलजलधरो गर्जितो वासवो वा ।
विद्युन्मालाकुलं वा यदि भवति नभो नष्टचन्द्रार्कतारं
तावद्वर्षन्ति मेघा धरणितलगता यावदाकार्तिकान्तम् ॥४१॥
माघे मासि निरन्तरं यदि भवेत् प्रालेयतोयागमो
वाता वान्ति च फाल्गुने जलधरैश्छिन्नै च छन्नं नभः ।
वैशाखे करकाः पतन्ति सततं ज्यैष्ठे प्रचण्डातपाः
तावद्वर्षति वासवो रविरसौ यावत्तुलायां व्रजेत् ॥४२॥

1 A माघस्य सित (should the words be माघस्यासित ? ) for माघे बहुल ।

2 B चैत्र for चैत्रे । A कृष्ण for शुक्ल । चैत्रमास्यापि (obviously corrupt) for चैत्रे...तृतीयायाम् ।

3 Omitted by B, D. B reads it with च for final वा । D reads it in the same place as B with वात for तड़ित ।

4 B क्षितिः for मही and in B it is followed by धनुर्मकरकुम्भेषु यदा वर्षति वासवः । तदादिसप्तमे मासि वारिपूर्णा भवेन्मही ॥

5 A योगात् for योगे । D भवति for पतति । A, D पक्ष for पक्षे ।

6 B वासरे for वासवो । C खण्डमेघाः सजलजलमुचो for चण्ड···धरो । D वाखण्डमेघाः for वाचण्डवेगः ।

7 A विद्युन्माला विशाला यदि भवति वियत् for विद्युन्माला···नभः ।

5-7 These lines occur in the *Bṛhat-saṃhitā* (xxv. 5) with the following variations:— हिमं for जलं, मास for पक्षे, वापि गर्जत्यजस्रम् for गर्जितो···वा ।

8 A इह धरणितले for धरणितलगता । B प्लुतधरणितले ( D धरणितलगतं ) for the same portion.

9-12 Omitted by A, B and D.

अथ फाल्गुनवृष्टिज्ञानम्—

पञ्चम्यादिषु पञ्चसु कुम्भेऽर्के यदि भवति रोहिणीयोगः।
अधमतमाधममध्यममहदतिमहाम्भसां निपातः ॥४३॥

अथ चैत्रवृष्टिज्ञानम्—

प्रतिपदि मधुमासे भानुवारः सितायां
यदि भवति तदा स्याच्चित्तला वृष्टिरब्दे।
अविरलपृथुधारासारवृष्टिप्रवाहै
र्धरणितलमशेषं प्लाव्यते सोमवारे ॥४४॥
अवनितनयवारे वारिवृष्टिर्न सम्यग्
बुधगुरुभृगुजानां शस्यसम्पत्प्रमोदः।
जलनिधिरपि शोषं याति वारे च शौरे
भवति खलु धरित्री धूलिजालैरदृश्या ॥४५॥

1-3 Omitted by A, B and D.

2-3 This verse is attributed to Varāha by Raghunandana in *Jyotistattva* (*Smṛti-tattva*, I. p. 700) with मतिमहदम्भसां पातः for महद...निपातः।

4 A, B अथ चैत्रलक्षणम्। D चैत्रे for चैत्र।

5 C वारे for वारः।

6 D आकुला for चित्तला।

5-6 Attributed by Raghunandana, in the same work, to Varāha, with निर्जला for चित्तला।

7 C प्रवाहे for प्रवाहै।

9 B नास्ति वृष्टिर्न शस्यं for वारि...सम्यग्।

10 B reads—कविगुरुभृगुजानां वासरे शस्यवृद्धिः। C भृगुवारे for भृगुजानां। D बुधगुरुजानां शस्यसम्यक्प्रमोदः; obviously a corrupt reading from metrical standpoint.

7-10 Attributed in *Jyotistattva* to Varāha (*Smṛti-tattva*, I. p. 700) with अविरत for अविरल, जल for पृथु, बिन्दु for वृष्टि, व्याप्यते for प्लाव्यते, सितवारे for भृगुजानां।

11 A inserts च bet. अपि and शोषं. B वारेषु for वारे च. C अविशोषं for अपि शोषं

12 D अवश्या for अदृश्या

चैत्राद्यभागे चित्रायां भवेच्च चित्तला क्षितिः ।
शेषे नीचैर्न वात्यर्थं क्ष्मामध्ये बहुवर्षिणी ॥४६॥
मूलस्यादौ यमस्यान्ते चैत्रे वायुरहर्निशम् ।
आर्द्रादीनि च ऋक्षाणि वृष्टिहेतोर्विशोधयेत् ॥४७॥

अथ वैशाखवृष्टिज्ञानम्—

प्रवाहयुतनद्यां तु दण्डं न्यस्य जले निशि ।
वैशाखशुक्लप्रतिपत्तिथौ वृष्टिं निरूपयेत् ॥४८॥
ओँ सिद्धिरिति मन्त्रेण मन्त्रयित्वा शतद्वयम् ।
अङ्कयित्वा तु तद्दण्डमङ्कतुल्ये जले क्षिपेत् ॥४९॥
प्रातरुत्थाय सहसा तदङ्कं तु निरूपयेत् ।
समं चैवाधिकं न्यूनं भविष्यज्जलकाङ्क्षया ॥५०॥

1 B भवेच्चेत् for भवेच्च. C चित्तर्चे for चित्रायां, भवेद् बहुजला for भवेच्च चित्तला. D reads the line as—तथा चैत्रादिभागे चेच्चित्रा बहुजला क्षितिः ।

2 B शेषेऽपि चैव चात्यर्थं for शेषे···वात्यर्थं. C reads the line thus—शेषे वै जलहीना स्यान्मध्ये च बहुवर्षणा. D पूरिता नदनद्यश्च for शेषे...वात्यर्थं ।

3-4 Omitted by B and D.

5 B, D वैशाखनिरूपणम् ( A वैशाखलक्षणम् ) ।

6 D च for तु ।

7 C वैशाखे for वैशाख, वृष्टिनिरूपणम् for वृष्टिं निरूपयेत् । D वैशाखशुक्लपक्षादौ तत्र for वैशाख···तिथौ ।

8 C ओमित्यनेन ( D ओँ प्रणवेन तु ) for ओँ···इति ।

9 B तं for तत्. C अर्द्धयित्वा and अर्द्धं for अङ्कयित्वा and अङ्क respectively. D reads the line thus—अकल्पयित्वा तं दण्डं जले निवेशयेत्ततः ।

10 Omitted by A. C तदर्द्धं च for तदङ्कं तु, D तदाङ्क विनिरूपयेत for तदङ्कं तु निरूपयेत् ।

11 C चापि for चैव. D वैवाधिकं for चैवाधिकं ।

गतवत्सरवद्वारि वन्या चैव समे भवेत् ।
हीने हीनं भवेद्वारि भवेद् वन्या च तादृशी ॥५१॥
अङ्काधिक्ये च द्विगुणा वृष्टिर्वन्या च जायते ।
इति पराशरेणोक्तं भविष्यद्वृष्टिलक्षणम् ॥५२॥
सूर्योदये विषुवतो जगतां विपत्ति
र्मध्यं गते दिनकरे बहुशस्यहानिः ।
अस्तंगते दिनकरे तु तदर्द्धशस्यं
ऐश्वर्यभोगमतुलं खलु चार्द्धरात्रे ॥५३॥

1 A समे न समं for गतवत्सरवत्, चैवासमे for चैव समे. C तथा for भवेत् ।

2 A वन्या च तादृशी परा for भवेत्···तादृशी·
C तथा for भवेत्, न for च.
D हीनेन च तथा वारि वदेऽन्या न for हीने...च ।

3 A reads अङ्काधिकेऽधिका वृष्टिर्वन्या च द्विगुणा भवेत्. C reads it thus—अधिके द्विगुणा वृष्टिर्वन्या च द्विगुणा भवेत्. D अधिके for आधिक्ये, वन्या वृष्टिश्च for वृष्टिर्वन्या च ।

4 Omitted by A. C पराशरोक्तं for पराशरेणोक्तं.
D इदं for इति ।

5 C, D प्रातर्दिने for सूर्योदये ।

6 C मध्यंदिने विक (फ ?) लतां for मध्यं...करे, D मध्यंदिने विषुवतो for the same portion.

7 C च तथा for तुतद्.
D बहुशस्यवृद्धि for तु···शस्यं ।

8 B रात्रौ for रात्रे.
D निशिचार्द्धरात्रौ for खलु···रात्रे ।

5-8 A reads these lines after verse 56 with the following variants:—मध्यंदिने for मध्यंगते (16), खलु चार्द्ध चार्द्धशस्य for तु···शस्यं (17).

रेखात्रयं समुल्लिख्य ताभिस्ताश्च विवर्द्धयेत् ।
त्रिशृङ्गं सर्वकोणेषु पर्वतं तत्र दापयेत् ॥५४॥
ईशानादिद्क्षिणाङ्कान् संलिखेदनलादितः ।
येनयेनाजसंक्रान्तिस्तेन प्रावृट्फलं भवेत् ॥५५॥

1 A, C रेखां तिर्यक् for रेखात्रयं, ताडितं ( A भाजितं ) for ताभिस्ताः, विदर्भयेत् for विवर्द्धयेत्. D तिर्यक् रेखावित् भवेत् for ताडितं··· विदर्भयेत ।

2 D त्रिशूलं for त्रिशृङ्गं ।

3 A reads the line as ईशादिदच्चिणां शृङ्गान्तं लिखेदनलभादितः ।
C reads ईशादिदत्तशृङ्गान्तं लिखेदनृतादिभिः ।
D reads ईशानादिदच्चिणान्तं विलिखेदनलादितः ।

4 A मेन for second येन. C तेन for first येन, वदेत् for भवेत् । D केनार्क for येनाज ।

4·5 After this line A reads :—

अश्विन्यादौ समुद्रे स्यात्नचत्रं च द्वयंद्वयम् ।
तीरपर्वतकच्छेषु एकैकं परिकीर्तितम् ॥

B gives the verse with समुद्रेषु for समुद्रे स्यात्, कच्छपर्वततीरेषु for तीर···कच्छेषु, as an alternative reading of the text quoted above.

In place of this verse, D reads as follows:—अपां निधौ द्वयं देयमेकैकं पर्वतेऽपि च । कच्छाष्टौ पर्वते चाष्टौ चतुस्तीरे चतुष्टयम् ॥ अश्विनीच···(?) पुष्पं सर्पं (?) वायुविशाखमेव च···(?) देयं तु न निधौ क्रमात् ॥

अतिवृष्टिः समुद्रे स्यादनावृष्टिस्तु पर्वते ।
कक्षयोश्चित्तला वृष्टिः सुवृष्टिस्तीरसङ्गमे ॥५६॥

अथ ज्यैष्ठवृष्टिलक्षणम्—

चित्रास्वातीविशाखासु ज्यैष्ठे मासि निरभ्रता ।
तास्वेव श्रावणे मासि यदि वर्षति वासवः ।
तदा संवत्सरो धन्यो बहुशस्यफलप्रदः ॥५७॥
ज्यैष्ठादौ सितपक्षे च आर्द्रादिदशऋक्षके ।
सजला निर्जला यान्ति निर्जलाः सजला इव ॥५८॥

1 D च for तु

2 B शैलसन्धिषु for तीरसङ्गमे. C मध्यमा for चित्तला. D reads the line thus तीरे च बहुला वृष्टिः सुवृष्टिः कच्छसंधयोः ॥ [ For A's reading after this line, see f. n. 5-8 under verse 53 *supra*. ]

3 A, B, D omit वृष्टि ।

4 A निरूपयेत् for निरभ्रता. D °खाः स्युः for °खासु.

4-5 Appear to have been attributed by Raghunandana, in *Jyotistattva* (*Smṛti-tattva*, I,p. 701), to Varāha, with वर्षति for वासवः ।

6 A सदा वर्षाः शुभा मताः for बहु…प्रदः ।

7 A ज्यैष्ठस्यादौ सिते पक्षे for ज्यैष्ठादौ…च ।

8 A तथा for इव. C reads निर्जलाः सजलाः प्रोक्ताः सजला निर्जलास्तथा ।

6-8 B reads these lines with the following variants bet. 33b and 34a *supra*, (p. 9).
सितपक्षे and च transposed (l 7), आर्द्रादौ for आर्द्रादि (l 7).

अथाषाढवृष्टिलक्षणम्—

आषाढ्यां पौर्णमास्यां सुरपतिककुभो वाति वातः सुवृष्टिः
शस्यध्वंसं प्रकुर्याद्दहनदिशिगतो मन्दवृष्टिर्यमेन ।
नैऋत्यां शस्यहानिर्वरुणदिशि जलं वायुना वायुकोपः
कौवेर्यां शस्यपूर्णां प्रथयति नियतं मेदिनीं शम्भुना च ॥५९॥
आषाढस्य सिते पक्षे नवम्यां यदि वर्षति ।
वर्षत्येव तदा देवस्तत्रावृष्टौ कुतो जलम् ॥६०॥
शुक्लाषाढ्यां नवम्यामुदयगिरितटी निर्मलत्वं प्रयाति
स्वीयं कायं विधत्ते खरतनुकिरणो मण्डलाकारयोगम् ।
जीमूतैर्वेष्टितोऽसौ यदि भवति रविर्गम्यमानेऽस्तशैले
तावत्पर्यन्तमेव प्रगलति जलदो यावदस्तं तुलायाः ॥६१॥

2 A, B ककुभं for ककुभो. A, C सुवृष्टिं for सुवृष्टिः. D दिशि चेद्वातिवायुः for ककुभो···वृष्टिः ।

3 A reads शस्यार्द्धं संप्रकुर्याद्दहनदिशिगतो मन्दवृष्टिं च यत्ते. B गते for गतो, C वृष्टि for वृष्टिः. D reads the line thus सस्याद्ध्यं संप्रकुर्याद्बहुलयदिगतो मन्दवृष्टिर्यमे च ।

2-3 Attributed to Varāha by Raghunandana in *Jyotistattva* (*Smṛti-tattva*, I. 700) with ०वृष्टिं, प्रकुर्यादिहदहनदिशो for प्र···गतो.

4 A शस्यहानिं जनयति वरुणे वायुना वायुकोणे for शस्य···पः. C कोणः for कोपः, C बहु for दिशि. D बहुजलो मारुतो वायुकोणे for दिशि···कोपः ।

5 C, D मेदिनी for मेदिनीं. B शस्यमीशे for शम्भुना च. D शस्यपूर्णा for ०पूर्णां, शंकरोति for शम्भुना च.

4-5 Attributed by Raghunandana, in *Jyotistattva* (*Smṛti tattva*, I, p.p. 700-701), to Varāha with निष्फला स्याद् वरुणबहुजलो for शस्य··· जलं and शस्यपूर्णा भवति समुदिता मेदिनी शम्भुनापि for शस्यपूर्णां···च ॥

7 D reads वर्द्धमेव तदा धान्य तत्रावृष्टेः कुतो भयम् ।

8 B शुक्लाषाढी for शुक्लाषाढ्यां, प्रयाते for प्रयाति ।

9 B कालं for कायं, तर for तनु, मुखं for योगम् ।

10 C जीमूते वृष्टितो for जी···तो ।

11 B प्रवदति for प्रगलति ।

8-11 Omitted by A, D. After line 11, C reads the following verses:—
आषाढशुक्लनवमीप्रभवप्रभाते, सूर्यो यदा प्रकटमण्डलमभ्युदेति ।
मध्यंदिनेऽपि यदि वा परिवेशमेति, सायं घनावृततनु (?) यदि वास्तमेति ॥
तत्र त्रयं द्वितयमप्यथ वैक (?) मिष्टं, वृष्टिं समादिशति नात्र विकल्पहेतुः ।
आश्रावणं स्रवति संततवारिधारा, माकार्तिकं पृथुपयोधरसान्द्रबिन्दुः ॥

अथ श्रावणवृष्टिलक्षणम्—

रोहिण्यां श्रावणे मासि यदि वर्षति वासवः।
तदा वृष्टिर्भवेत्तावद् यावन्नोत्तिष्ठते हरिः ॥६२॥
कर्कटे रोहिणीऋक्षे यदि वृष्टिर्न जायते।
तदा पराशरः प्राह हा हा लोकस्य का गतिः ॥६३॥
श्रावणे मासि रोहिण्यां न भवेद्वर्षणं यदि।
विफलारम्भसंक्लेशास्तदा स्युः कृषिवृत्तयः ॥६४॥

अथ सद्योवृष्टिज्ञानम्*—

जलस्थो जलहस्तो वा निकटेऽथ जलस्य वा।
स्रष्टा पृच्छति सृष्ट्यर्थं वृष्टिः संजायतेऽचिरात् ॥६५।

1 A omits अथ and वृष्टि. B omits वृष्टि. D श्रावणनिरूपणं for श्रावण… लक्षणम्।

2 C वृष्टिर्भवेद्ध्रुवं for वर्षति वासवः।

6 A वर्षणं न भवेत् for न...वर्षणं. C चतुर्थ्यां श्रावणे मासि for श्रावणे...रोहिण्यां।

7 C संकाशा for संक्लेशा. For lines 6-7, D reads—श्रावणे मासि हस्ते यदि वर्षति वासवः। विपुला च तदा तु स्यात्कृषिवृत्तिर्विनश्यति ॥ After line 7, C adds—श्रावणे प्रथमे पक्षे पूर्वभाद्रपदेषु च। चतुर्थ्यां यदिवर्षं च तदा वर्षति वासवः॥ पुरोवातहते (?) ग्रीष्मे श्रावणे वापि चर्षे हि। मेरुर्दर्शयते शृङ्गं जलधिः शुष्यते तदा॥ पाश्चात्यः कर्कटेवापि प्राच्यः कन्यां गते रवौ। सिंहे निर्वाततामेति जलपूर्णामहीभवेत्॥ दिवा जलधरैश्छन्नं रात्रौ च निर्मलं नभः। शोषमेति तदा पृथ्वी नात्र कार्यविचारणा। After the same line, B adds—अथ भाद्रादिलक्षणम्। सिंहे भौमवारे च पूर्वफल्गुनिनक्षत्रके। व्यतीपाते च नन्दायां कन्यायां वर्षयेद् रविः॥, and D adds—इति पौषाद्यष्टमासिकवृष्टिज्ञानलक्षणम्।

* It is interesting to note the common indications mentioned here as well as in the *Bṛhat-saṃhitā, Sadyovarṣaṇalakṣaṇam*, pp. 411-422.

8 A, D लक्षणं for ज्ञानम्।

9 B transposes जलस्थो जलहस्तो. C, D च for final वा. D तुलस्थे तुलहस्त (?) for जलस्थो जलहस्तो।

10 B दृष्ट्वा for स्रष्टा, वृष्ट्यर्थं for सृष्ट्यर्थं. C वृष्टः पृच्छति वृष्ट्यर्थं for स्रष्टा… सृष्ट्यर्थं, D वृष्टिप्रश्नो यदा भूयाद् for the same portion, and चिरात् for अचिरात्।



34446

उत्तिष्ठत्यण्डमादाय यदा चैव पिपीलिका ।
भेकः शब्दायतेऽकस्मात् तदा वृष्टिर्भवेद्ध्रुवम् ॥६६॥
विडाला नकुलाः सर्पा ये चान्ये वा विलेशयाः ।
धावन्ति शलभा मत्ताः सद्योवृष्टिर्भवेद् ध्रुवम् ॥६७॥
कुर्वन्ति बालका मार्गे धूलिभिः सेतुबन्धनम् ।
मयूराश्चैव नृत्यन्ति सद्योवृष्टिर्भवेद् ध्रुवम् ॥६८॥
आघातवातदुष्टानां नृणामङ्गे व्यथा यदि ।
वृक्षाग्रारोहणंचाहेः सद्योवर्षणलक्षणम् ॥६९॥

1 A उत्तिष्ठेत् for उत्तिष्ठति.
B अकस्मादन्नमादाय उत्तिष्ठति for उत्तिष्ठत्यण्डम...चैव.
C उत्तिष्ठन्ते for उत्तिष्ठति, पिपीलिकाः for पि...का।

2 A सद्यः for तदा.
D संजायते कस्मात् for शब्दायतेऽकस्मात्

3 A अन्ये ये च for ये···वा. D विडालनकुलाः for विडालानकुलाः, वारिलेखया for वा...शयाः ।

4 For this line, A reads—कुर्वन्ति च स्वनं मत्ताः सद्यो वर्षणलक्षणम् ॥
B शरभा for शलभा.
C तदा for ध्रुवम् ।

5 C बालिका for बालका.
D बानिशा for बालका ।

6 A वर्षणलक्षणम् for वृष्टि...ध्रुवम्, B, D प्रजायते for भवेद् ध्रुवम् ।

7 C अघातवातदृष्टीनां for आघात...दुष्टानां, अङ्ग for अङ्गे ।
D reads वातादवाते वृष्टिः स्यात् नृणामङ्ग (?) तथाधनाः (?) ।

8 A अहेः for चाहेः. C reads the line as सर्पा वृक्षाग्रमारूढाः सद्यो वृष्टेस्तु लक्षणम्. D reads it वृक्षाग्रावो (?) ह्रलेदन्तः सद्यो वर्षति वासवः ।

पक्षयोः शोषणं रौद्रे खगानामम्बुचारिणाम् ।
झिल्लीरवस्तथाकाशे सद्यो वर्षणलक्षणम् ॥७०॥

अथ ग्रहसंचारे वृष्टिज्ञानम्—

चलत्यङ्गारके वृष्टिर्ध्रुवा वृष्टिः शनैश्चरे ।
वारिपूर्णां महीं कृत्वा पश्चात् संचरते गुरुः ॥७१॥
ग्रहाणामुदये चास्ते तथा वक्रातिचारयोः ।
प्रायो वर्षन्ति हि घना नृपाणामुद्यमेषु च ॥७२॥

1 D reads it thus पक्षिणः सोशिता ( शोषिता ? ) रौद्रेऽकस्माद-म्बुचारिणः ।

2 B वृष्टिः प्रजायते for वर्षणलक्षणम्. D झर्झरो (?) वै यदाकाशे for झिल्ली...काशे. After this line, C add the following:—यद्यूर्द्ध्वं (?) कृकलासकास्तरुगताः पश्यन्ति गावो मुहुः । दृष्टार्कं ( दृष्ट्वार्कं ? ) यदि वा चरन्ति बहुशः संरौति भेकी यदि ॥ संचारस्तु पिपीलिकाण्डविषयोरद्वारजगात-गणां (?) ।...(?) क्षिणदिधीतिः ( दीधितिः ? ) शिवदिशि क्षिप्रं तदा वर्षति ॥ शनौ कुजे गुरौ चैव परिवेशो यदा भवेत् । चतुर्थे पञ्चमे वापि जलपूर्णा भवेन्मही ॥ यदि भवति कदाचित् कार्तिके नष्टचन्द्रे । रविशनिकुज-वारे स्वातिनक्षत्रयोगः ॥ भवति भूरिनिपातः स्थावराणां नराणाम् । त दपि (?) टपिपशूनां वारिणा वायुना वा ॥ प्रावृषि शीतकरो भृगुपुत्रात् सप्तमराशिगतः शुभदृष्टः । सूर्यसुतान्नवपञ्चमगो वा सप्तमगश्च जलागमनाय ॥

3 A ग्रहसंचारलक्षणात् for ग्रह...ज्ञानम्. B वृष्टिलक्षणम् for वृष्टिज्ञानम्. C संचारेण for संचारे।

4 A चरत्य° for चलत्य° ।

5 C एकार्णवां for वारिपूर्णां ।

6 D तदा for तथा ।
Bet. lines 3 and 4, D reads सयोर्वृष्टिकरं ( रः ? ) शुक्रो यदा बुधसमीपगः । तयोर्मध्यगतो भानुः समुद्रमपि शोषयेत् ॥

7 A वर्षन्ति जलदास्तत्र for प्रायो...घना. B जलदा for हि घना, उद्यमेऽपि च for उद्यमेषु च. D वर्षति जीमूतो for वर्षन्ति हि घना, उद्यमेऽपि च for उद्यमेषु च ।

चित्रामध्यगते जीवे भिन्नभाण्डमिव स्रवेत् ।
ततः स्वातिं समासाद्य महामेघान् विमुञ्चति ॥७३॥
पुष्येणोपचितान् मेघान् स्वातिरेका व्यपोहति ।
श्रवणे जनितं वर्षं रेवत्येका विमुञ्चति ॥७४॥

1 A ०गतो जीवो for ०गते जीवे. C सूर्ये for जीवे. D खगा भाण्ड इवस्स्रवेत् (?) ।

Bet. lines 5 and 6, C adds the following: यदि व्रजति कुजः पतङ्गमार्गे घट इव भिन्नतलो जलं ददाति । अथ वहति दिनकराग्रतो वा, भवति च तदासौ प्रलयाया ( ? ) समर्थः ॥१॥ यद्येकराशौ भवतः सि ( ? ) तेन्दुजौ पयोऽतिपूर्णां कुरुतो वसुन्धराम् । तयोस्तु मध्ये यदि पद्मबान्धवः, तया मही-शोषमुपैति नान्यथा ॥२॥ सिंहं गते क्षितिसुते शुभवर्जिते च, शोषं वायुः प्रलय इवान्बुबाहाः । भिन्नेन्दुनील ( भिन्नेन्द्रनील ? ) सकलोपमवामेद्यमाना (?), वर्षन्ति ते कृपणदानमिवाम्बुवृष्टिम् ॥३॥ तामापतन्तीं कुरुराजसेनां, समुद्रनेलामिव दुर्निवाराम् । निवारयत्येकरथेन पार्थश्चितां ( लां ? ) गतः सूर्य इवाम्बुवृष्टिम् ।४॥ अत्युन्नतं जलदवृन्दनुपैति नाश, मङ्गारके यदि बृहस्पतिनैकराशिम् । शोषं प्रयान्ति सरितो ह्रदनिर्झरास्ते, पवनयं भवति तत्र तुषारवृष्टिः ॥५॥ सलिल-रहितशक्रो याति शक्रो याति शोषं धरित्री । भवति सततवातो धूलिरुद्धं नभोऽपि ॥६॥ भवति समरभीतिर्याति नाशं नरेन्द्रो । युवतिमिथुनमीने कार्मुके मन्दगे च ॥७॥ एकराशिगताः पापाः शनिभौमदिवाकराः । पृथ्वीध् (?) माकुली ( ला ? ) तत्र रुदन्ति बहवो जनाः ॥८॥

[ For some of these verses, sometimes with variants, see footnote 8 under verse 78 ]

2 A, D तथा for ततः. महामेघो न वर्षति for महा...विमुञ्चति. D ०मेघो for मेघान् ।

3 A अपचितान् ( ? ) for उपचितान्. B प्रायेण for पुष्येण, ०व्यपोहति for व्यपोहति ।

4 A मेघं for वर्षः. B रेवत्यां च for रेवत्येका. C व्यपोहति for विमुञ्चति. D रेवत्यन्ते for रेवत्येका ।

अथानावृष्टिलक्षणम्—

ध्रुवे च वैष्णवे हस्ते मूले शक्रे चरन् कुजः ।
सद्यः करोत्यनावृष्टिं कृत्तिकासु मघासु च ॥७५॥
कुजपृष्ठगतो भानुः समुद्रमपि शोषयेत् ।
स एव विपरीतस्तु पर्वतानपि प्लावयेत् ॥७६॥
सद्यो निकृन्तयेद्वृष्टिं चित्रामध्यगतो भृगुः ।
अङ्गारको यदा सिंहे तदाङ्गारमयी मही ॥७७॥
स एव रविणा युक्तः समुद्रमपि शोषयेत् ॥७८॥

1 D अवृष्टिज्ञानम् for अना...लक्षणम् ।

2 A, C ध्रुवेषु for ध्रुवे च. C ज्येष्ठे मूले च भानुजः for शक्रे...कुजः ।

4 C adds यदि कुजश्चरति (evidently corrupt) before the line.

5 A सेचयेत् for प्लावयेत्. C समुद्रमपि पूरयेत् for पर्वतानपि प्लावयेत् ।

6 The portion following मध्य is obscure in A.

8 रविविना for रविणा. After this line, D adds the following verses:

(i) Verse 8 in the footnote under v. 73.

(ii) Verse 5 (*ibid*) with विन्दु for वृन्द ।

(iii) Last two feet of v. 5 (*ibid*) with च for ते, नित्यं ज्ञिनो for पक्षत्रयं, चात्र for तत्र ।

(iv) तावन्मेघाः प्रवर्षन्ति निर्घोषचपलान्विताः ।
यावत्कन्यां परित्यज्य तुलां नोपैति भार्गव ( वः ? ) ॥

(v) V. 4 in the footnote under v. 73.

(vi) चतुर्दशे पञ्चदशे तथाष्टमे तम...(?) दिने भृगोः सुतः ।
यदा...(?) दर्शनमस्तमेति तदा महीवारिमयैव लक्ष्यते ॥

(vii) V. 1 in the footnote under v. 73 with following variants: यदि व्रजति transposed, मार्गं for मार्गे, तनु for तनो, व्रजति यदि for अथ वहति, दिव for दिन,...(?) शोषितुं समर्थः for the last foot.

(viii) V. 3 (*ibid*) with गतः for गते, ०युतः for युते, ०वर्जितः for ०वर्जिते ; शोषं नयेत् प्रलयकाल इवान्बुवाहान् for the second foot, भिन्नेन्द्रनील-सदृशा अपि मेघसंघा for the third foot, दानतुषारवृष्टिः for दानमिवाम्बु-वृष्टिम् । This topic is concluded with the remark इत्यनावृष्टिलक्षणम् ।

अथ कृष्यवेक्षणम्

फलत्यवेक्षिता स्वर्णं दैन्यं सैवानवेक्षिता ।
कृषिः कृषिपुराणज्ञ इत्युवाच पराशरः ॥७९॥

अथ चान्ये मुनयः—

पितुरन्तःपुरं दद्यान्मातुर्दद्यान्महानसम् ।
गोषु चात्मसमं दद्यात् स्वयमेव कृषिं व्रजेत् ॥८०॥
कृषिर्गावो वणिग्विद्याः स्त्रियो राजकुलानि च ।
क्षणेनैकेन सीदन्ति मुहूर्तमनवेक्षणात् ॥८१॥
समर्थेन कृषिः कार्या लोकानां हितकाम्यया ।
असमर्थो हि कृषको भिक्षां प्राप्नोति मानवः ॥८२॥

1 B कृषिपर्यवेक्षणम् for कृ...म्. D omits the line. अवेक्षणात् for अवेक्षिता ।

2 B तद्दैन्यमनवेक्षणात् for दैन्यं.. क्षिता. C तदन्यदनवेक्षिता for the same portion.

3 D पुराणंग for पुराणज्ञ ।

4 A, D तथा च मनुः. C reads मनुः simply.

5 C पुरे for ॰पुरं, महानसे for महानसम् ।

6 D चान्येषु नो for चा...मं. It may be pointed out that none of the verses from 82 to 85 occurs in the *Manu-Smṛti* ( N. S. Press ed. ). V. 82, however, occurs verbatim in the *Udyoga-parvan* of the *Mahābhārāta.* (Chapter 38, v. 12).

7 B बाणविद्याः for वणिग्विद्याः, C बालश्चाग्नि for the same portion, गाव for राज. D विद्या for विद्याः ।

8 B क्षणेनैवावसीदन्ती ( C ॰वापसीदन्ति ) for क्षणेन...सीदन्ति. D नश्यन्ति for सीदन्ति ।

9 A प्रजानां for लोकानां ।
B समर्थश्च for समर्थेन ।

10 B भटति नीचवत् for प्राप्नोति मानवः ।

गोहितः क्षेत्रगामी च कालज्ञो बीजतत्परः ।
वितन्द्रः सर्वशस्याढ्यः कृषको नावसीदति ॥८३॥

अथ वाहनविधानम्—

कृषिं च तादृशीं कुर्याद्यथा वाहान्न पीडयेत् ।
वाहपीडार्जितं शस्यं गर्हितं सर्वकर्मसु ॥८४॥
वाहपीडार्जितं शस्यं फलितं च चतुर्गुणम् ।
वाहनिःश्वासवातेन तद्द्रुतं च विनश्यति ॥८५॥
गुडकैर्यवसैर्धूमैस्तथान्यैरपि पोषणैः ।
वाहाः क्वचिन्न सीदन्ति सायं प्रातश्च चारणात् ॥८६॥

1 A कालबीज for कालज्ञो. D बालको (an obvious error) for कालज्ञो ।

2 The first word in A is illegible. C सस्यग्रहणदक्षश्च for वितन्द्रः सर्वशस्याढ्यः. D सुशिष्य for वितन्द्रः ।

3 A वाहपालनविधिः for वा...नम्. D inserts पालन bet. वाहन and विधानम् ।

4 A एतादृशीं विद्यात् for च...कुर्यात् ।

5 C, D पितृदेवयोः for सर्वकर्मसु ।

6 C reads वाहपीडोज्झितं शस्यं फलत्येव चतुर्गुणम् ।

7 A द्रुतमेव for तद्द्रुतं च. B reads वाहनिः श्वासविफलः कृषको निःस्वतां व्रजेत्. C दोषेण for वातेन. D reads the line thus वाहनिःश्वासाविफलं कृतं सर्वं च नश्यति ।

8 A गुग्गुलैः, अपि and पोषणैः transposed. B गुणकैः for गुग्गुलैः. C यवगोधूमै for यवसूधूमै ।

9 C हीयन्ते for सीदन्ति ।

8-9 Omitted by D which reads instead—स च दारिद्र्यदोषेण पृथिव्यां भ्रमति ध्रुवम् । चतुर्दिक्षु महादुःखी यो वाहान् परिपीडयेत् । वाहा दुःखं न दीयन्ते सायं प्रातश्च चारणात् ॥

गोशाला सुदृढा यस्य शुचिर्गोमयवर्जिता ।
तस्य वाहा विवर्द्धन्ते पोषणैरपि वर्जिताः ॥८७॥
गोशकृन्मूत्रलिप्ताङ्गा वाहा यत्र दिने दिने ।
निःसरन्ति गवां स्थानात् तत्र किं पोषणादिभिः ॥८८॥
पञ्चपदा तु गोशाला गवां वृद्धिकरी स्मृता ।
सिंहगेहे कृता सैव गोनाशं कुरुते ध्रुवम् ॥८९॥
कांस्यं कांस्योदकं चैव तप्तमण्डं फणोदकम् ।
कार्पासशोधनं चैव गोस्थाने गोविनाशकृत् ॥९०॥

1 Before this line, B reads अथ गोशालाविधानम्. D शोभना for सुदृढा, वर्द्धिते for वर्जिता ।

2 A गावो for वाहा.
D गावस्तस्य च वर्द्धन्ते for तस्य...विवर्द्धन्ते ।

3 A गावो for वाहा. B शकृन्मूत्रविलिप्ताङ्गा for गो...लिप्ताङ्गा. C लिप्ताश्च ( D संलिप्ता ) for लिप्ताङ्गा ।

4 C निश्वसन्ति for निःसरन्ति, स्थाने for स्थानात्.
D पोषणादिकं for ०दिभिः ।

5 B पञ्चपञ्चायता शाला for पञ्च...शाला, मता for स्मृता ।

6 Omitted by A. B ०स्थाने for ०गेहे.
C गोशालां ह्रियते for गोनाशं कुरुते.
D सिंहे गोष्ठीकृत ( ता ? ) for सिंह...कृता ।

7 A तण्डुलस्योदकं ( B तण्डुलानां जलं ) for कांस्यं कांस्योदकं. D तप्तमदो (?) for तप्तमण्डं ।

Bet. 6 and 7, B reads सिंहगेऽहर्पतौ चैव गोशालां कुरुते यदि । प्रमादान्मन्दबुद्धित्वाद् गवां नाशो भवेत्तदा ॥ A also reads this verse in the same place with the following variants सिंहगेहे कृते for सिंह...पतौ.

8 B कार्पासास्थितुषं for कार्पासशोधनं.
C गोशाले च विनाशकृत् for गो...कृत्.
D चापि for चैव, गोस्थो गोषु नाशकृत for गो...कृत् ।

संमार्जनीं च मुसलमुच्छिष्टं गोनिकेतने ।
कृत्वा गोनाशमाप्नोति तत्राजबन्धनाद् ध्रुवम् ॥९१॥
गोमूत्रजालकेनैव यत्रावस्करमोचनम् ।
कुर्वन्ति गृहमेधिन्यस्तत्र का वाहवासना ॥९२॥
विलङ्घिं गोमयस्यापि रविभौमशनेर्दिने ।
न कारयेद् भ्रमेणापि गोवृद्धिं यदि वाञ्छति ॥९३॥
वारत्रयं परित्यज्य दद्यादन्येषु गोमयम् ।
शनिभौमार्कवारेषु गवां हानिकरः स्मृतः ॥९४॥
सन्ध्यायां तु गवां स्थाने दीपो यत्र न दीयते ।
स्थानं तत्कमलाहीनं वीक्ष्य क्रन्दन्ति गोगणाः ॥९५॥

1 संमार्जनीमुसलं च for स···मुसलं.
B अशनं for मुसलं ।
D भुक्तोच्छिष्टं for उच्छिष्टं गो ।

2 B तथा तत्राजबन्धने for तत्राज···ध्रुवम्, C स्थानादन्यत्र बन्धनात् for the same portion, D तथा तत्राजबन्धनम् ।

3 A तत् for तत्र, शोधनं for मोचनम्. C यदा अत्तर (?) for यत्रावस्कर. D चैव for ०नैव ।

4 C परिदेवना for वाहवासना, D वाहनाशनं for the same portion.

5 C विलब्धं ( D विलोपं ) for विलङ्घि. A, D शनैः for शनेः ।

6 A प्रयत्नेन for भ्रमेणापि ।

7 Omitted by A.

8 Omitted by A. B विलभ्य शनिभौमेषु for शनि···वारेषु. C नाशकरः पुनः for हानि···स्मृतः. D विलेपं शनिभौमेषु for शनि...वारेषु, ०करं स्मृतं for ०करः स्मृतः ।

9 A सन्ध्याद्वये तु गो ( B सन्ध्याकाले च गो, C सन्ध्याद्वयेगवां ) for सन्ध्यायां तु गवां. A विद्यते for दीयते ।

10 A तत्र प्रभां for तत्कमला, दृष्ट्वा क्रन्दति गोगणः for वीक्ष्य···गणाः. C कर्मणा for कमला, धनाः for गणाः ।

हलमष्टगवं प्रोक्तं षड्गवं व्यवहारिकम् ।
चतुर्गवं नृशंसानां द्विगवं तु गवाशिनाम् ॥९६॥
नित्यं दशहले लक्ष्मीर्नित्यं पञ्चहले धनम् ।
नित्यं तु त्रिहले भक्तं नित्यमेकहले ऋणम् ॥९७॥
आत्मपोषणमात्रं तु द्विहलेन च सर्वदा ।
पितृदेवातिथीनां च नान्नदाने भवेत् क्षमः ॥९८॥

अथ गोपर्वकथनम्—

गोपूजां कार्तिके कुर्याद्गुडप्रतिपत्तिथौ ।
बद्ध्वा श्यामलतां शृङ्गे लिप्त्वा तैलहरिद्रया ॥९९॥

1 Before this line, D reads अथ हव ( हल ? ) निरूपणम्.
A, B व्यवसायिनां for व्यवहारिकम्. B धर्म्यं for प्रोक्तं ।

2 B च for तु ।

1-2 Attributing these lines to Hārīta, in *Jyotistattva* (*Smṛti-tattva*, I, p. 703), with अष्टागवं धर्महलं for हल...प्रोक्तं, जीविताथिनाम् for व्यवहारिणम्, ब्रह्मघातिनां for तु गवाशिनाम्. Raghunandana says that such is the reading in the *Viṣṇudharmottara*.

4 A च for तु. C द्वि for त्रि, भुक्तं for भक्तं. D त्रिहले भुक्तिमात्रं तु for नित्यं...भक्तं ।

3-4 Attributed by Raghunandana, in the same book, p. p. 688-689, to the *Rāja-mārtaṇḍa*.

5 Omitted by C. D भवेन्नरः (?) for च सर्वदा ।

6 A तु for च.
B पुष्ट्यर्थं सोऽक्षमो भवेत् for नान्न...क्षमः ।

8 A, C पर्व for पूजां.
A मासि for कुर्यात् ।

9 A ०लताः for लतां. B स्कन्धे for शृङ्गे. C बाह्व for बद्ध्वा, संलिप्य तेन घोषया (?) for लिप्त्वा…हरिद्रया. D नित्य ( नृत्य ? ) गीतैश्च कौतुकैः for लिप्त्वा...हरिद्रया ।

कुङ्कुमैश्चन्दनैश्चापि कृत्वा चाङ्गे विलेपनम् ।
उद्यम्य लगुडं हस्ते गोपालाः कृतभूषणाः ॥१००॥
ततो वाद्यैश्च गीतैश्च मण्डयित्वाम्बरादिभिः ।
भ्रामयेयुर्वृषं मुख्यं ग्रामे गोविघ्नशान्तये ॥१०१॥
गवामङ्गे ततो दद्यात् कार्तिकप्रथमे दिने ।
तैलं हरिद्रया युक्तं मिलित्वा कृषकैः सह ॥१०२॥
तप्तलौहं दिने तस्मिन् गवामङ्गेषु दापयेत् ।
छेदनं च प्रकुर्वीत लाङ्गूलकचकर्णयोः ॥१०३॥
सर्वा गोजातयः सुस्था भवन्त्येतेन तद्गृहे ।
नानाव्याधिविनिर्मुक्ता वर्षमेकं न संशयः ॥१०४॥

1 A चैवांगलेपनं for चांगे विलेपनम्. C चांगापलेपनं ( चांगोपलेपनं ? ) for the same portion. D ञ्ङ्गे for चाङ्गे ।

2 C पुच्छे for हस्ते, गोशालाः for गोपालाः ।

3 B, C नृत्यैः for गीतैः. D अथ वाद्यैर्नृत्यगीतैः for ततो...गीतैश्च, सुवादिभिः for अम्बरादिभिः. C reads this line before L 1.

4 A, C भ्रामयेत् परमं सौम्यं for भ्रामयेयु...मुख्यं. D भ्रमणे तृतीयं ग्रामविघ्न-शान्तये ततः ।

5 A तथा for ततो, अप्रजद्रयं (?) for अम्भसा सह. B तदा for ततो. C वैशाखस्याम्भसा सह for कार्तिकप्रथमेदिने ; मस्तके तु गवां for गवा...ततो. D मध्ये for अङ्गे ; वैशाखस्या...(last four letters corrupt) for कार्तिक ...दिने ।

6 B कुङ्कुमैः ( D कर्षकैः ) for कृषकैः. C omits the line.

7 B reads तप्तलौहादिकं तत्र गवामंगे प्रदापयेत्. D अंगे प्रतापयेत् for अंगेषु दापयेत् ।

8 A तु ततः कुर्यात् for च प्रकुर्वीत. B लोम्नां लाङ्गूल for लाङ्गूलकच. C प्रकुर्वन्ति for प्रकुर्वीत, लाङ्गूलस्य च for लाङ्गूलकच ।

9 A सर्वा गौर्जायते तेन सुस्था भवन्ति तद्गेहे. D तदा for सर्वा ।

10 C नाश for नाना ।

**अथ गोयात्राप्रवेशौ—**

पूर्वात्रयं धनिष्ठा च इन्द्राग्निसौम्यवारुणाः ।
एते शुभप्रदा नित्यं गवां यात्राप्रवेशयोः ॥१०५॥
त्रिपूत्तरेषु रोहिण्यां सिनीवाली चतुर्दशी ।
पुष्यश्रवणहस्तेषु चित्रायामष्टमीषु च ॥१०६॥
गवां यात्रां न कुर्वीत प्रस्थानं वा प्रवेशनम् ।
पशवस्तस्य नश्यन्ति ये चान्ये तृणचारिणः ॥१०७॥
अर्कार्किकुजवारेषु गवां यात्राप्रवेशयोः ।
गमने गोविनाशः स्यात् प्रवेशे गृहिणीवधः ॥१०८॥

**अथ गोमयकूटोद्धारः—**

माघे गोमयकूटं तु संपूज्य श्रद्धयान्वितः ।
शोभने दिवसे ऋक्षे कुद्दालैस्तोलयेत्ततः ॥१०९॥

1 A कथनं for प्रवेशौ. B गवां for गो. D प्रवेशकथनं for प्रवेशौ ।

2 A शाक्रसौम्याग्नि for इन्द्राग्नि...वारुणाः. C इन्द्राग्नौ for इन्द्राग्नि. D त्रय for त्रयं, धनिष्ठेद्रानैन्द्राग्नि for धनिष्ठा...ग्नि ।

4 A कुहूस्तथा for चतुर्दशी. B उत्तरात्रय for त्रिपूत्तरेषु ।

5 C श्रवेणाहस्तशक्रेषु for पुष्य...हस्तेषु. D श्रवणे पाष्य (?) हस्ते च आर्द्रायां for पुष्य···चित्राय ।

6 A reads गवां यात्रां प्रकुर्वन्ति प्रवेशं वा कथंचन. D स्वस्थाने for प्रस्थानं ।

7 A हलधारिणः for तृणचारिणः. D तेन for तस्य, पशुजातयः for तृणचारिणः ।

9 A विनाशः स्याद् गवां गेहे for गमने...स्यात्.
C गृहिणी for गृहिणो ।

10 D omits कूट ।

11 A च for तु, कृषितत्परः for श्रद्धयान्वितः.
D सिद्धया (?) for श्रद्धया ।

12 B सारंशुभदिनं प्राप्य ( D सार' शोभनदिवसे ) for शोभने...ऋक्षे.
C चैव for ऋक्षे ।

रौद्रे संशोष्य तत् सर्वं कृत्वा गुण्डकरूपिणम् ।
फाल्गुने प्रतिकेदारे सारं गर्ते निधापयेत् ॥११०॥
ततो वपनकाले तु कुर्यात् सारविमोचनम् ।
विना सारेण यद्धान्यं वर्द्धते फलवर्जितम् ॥१११॥

अथ हलसामग्रीकथनम्—

ईषायुगहलस्थाणुर्निर्योलस्तस्य पाशिकाः ।
अड्डचल्लश्च शौलश्च पच्चनी च हलाष्टकम् ॥११२॥
पञ्चहस्ता भवेदीषा स्थाणुः पञ्चवितस्तिकः ।
सार्द्धहस्तस्तु निर्योलो युगं कर्णसमानकम् ॥११३॥

1 A रूपणं (?) ( C रूपकं ) for रूपिणम्. C सारं for सर्वं, गुण्डूक ( D गुण्डिक ) for गुण्डक ।

2 B गर्तं कृत्वा for सारं गर्ते ।

3 C अत्र परकाले for वपनकाले ।

4 B, C, D न फलत्यपि for फलवर्जितम्.
C कुर्वते for वर्द्धते ।

5 A omits कथनम् ।

6 B ईशोयुगो हल ( C ईशोयुगं हलं ) for ईषा...हल. A निर्योनि (?) ( C निर्योगः ) for निर्योल, A, C पालिका for पाशिकाः . D reads the line thus—सायुग्मं हलस्थाणुनिर्याणस्तस्य पूलिका. For construction of '*īṣā*', see *Bṛhat-saṃhitā* 78.27 and comm. thereon.

7 A reads the line thus—अतोबन्धः शल्लीकं च प्राजनं चेति चाष्टकम् । C मसीनश्च for शौलश्च, पाचनी for पच्चनी, जोति ( चेति ? ) चाष्टकम् ।
D...(?) सलिलप्राजनि तेजनी च (?)

8 B, C, D हस्तो for °हस्ता. B, C ईशः for ईषा ।

9 A सार्द्धहस्तं तुनिर्योनि.
B युगः कर्णसमानकः.
C च for तु, निर्योगो for निर्योल.
D reads सार्द्धहस्तरक्तनिर्याणं युग्मकर्णममात्मकम् ।

नियोलःपाशिका चैव अड्डचल्लस्तथैव च ।
द्वादशाङ्गुलमानौ तौ शौलोऽरत्निप्रमाणकः ॥११४॥
सार्द्ध द्वादशमुष्टिर्वा कार्या वा नवमुष्टिका ।
दृढा पञ्चनिका ज्ञेया लौहाग्रा वंशसंभवा ॥११५॥
आबद्धो मण्डलाकारश्चतुःपञ्चाशदङ्गुलः ।
योत्रं हस्तचतुष्कं स्यात् रज्जुः पञ्चकरात्मिका ॥११६॥
पञ्चाङ्गुल्यधिको हस्तो हस्तौ वा फालकः स्मृतः ।
अर्कस्य पत्रसदृशी फालिका तु नवाङ्गुला ॥११७॥
एकविंशतिशल्यस्तु विद्धकः परिकीर्तितः ।
नवहस्ता तु मदिका प्रशस्ता सर्वकर्मसु ॥११८॥

1 A प्रतिवन्ध for अड्डचल्ल. C नियोंग, चेति for चैव. A नियोंनि पालिका for नि···पाशिका. D निर्य्योणकालिका for नियोंलपाशिका ।

2 A तु for तौ, शलोकं हस्तमानकं for शौलो···माणकः. D reads the line as—अङ्गुल्यो ( अङ्गुल्यो ? ) द्वादश एते सलिलोन्धुप्रमाणकः ।

4 A प्राजनिका ( C पाचनिका, D पाश्चालिका ) for पञ्चनिका. C विज्ञैः ( D रिक्ता ) for ज्ञेया ।

5 B स्मृतः पञ्चदशाङ्गुलः for चतुः···अङ्गुलः. C, D कुण्डल for मण्डल. D अबन्धः ( B आबन्धो ) for आबद्धः, दशपञ्चाङ्गुल ( लः ? ) स्मृतः ।

6 A अङ्गजं ( ? ) वान ( ण ? ) हस्तकम् for रज्जु···त्मिका, B च for स्यात. C कडकः पञ्चहस्तकः for रज्जुः···त्मिका. D reads या...( ? ) हस्तचतुष्टं च स्फोटकः पञ्चकात्मकः ।

7 A पञ्चाङ्गुलेनैको हस्तो लौहस्य for पञ्चा···वा, B ०लाधिको for ०ल्यधिको. D पञ्चमाङ्गुलिलो ( ? ) हस्तो लाङ्गलेलो for पञ्चा...वा ।

8 A अर्कपत्रस्य for अर्कस्य पत्र. B पाशिका for फालिका. D अबन्धः सदृशः फालो मध्ये चैव for अर्कस्य···तु ।

9 A वैदिक ( D विन्धकः, C विद्रवः ) for विद्धकः. C ०काङ्गुलि for ०शल्यस्तु ।

10 B कृषि for सर्व. C मयिका for मदिका. D प्रशस्या for प्रशस्ता ।

इयं हि हलसामग्री पराशरमुनेर्मता ।
सुदृढा कृषकैः कार्या शुभदा सर्वकर्मसु ॥११९॥
अदृढायुक्तमाना या सामग्री वाहनस्य च ।
विघ्नं पदे पदे कुर्यात् कर्षकाले न संशयः ॥१२०॥

अथ हलप्रसारणम्—

अनिलोत्तररोहिण्यां मृगमूलपुनर्वसौ ।
पुष्यश्रवणहस्तासु कुर्याद्धलप्रसारणम् ॥१२१॥
हलप्रसारणं कार्यं कृषकैः शस्यवृद्धये ।
शुक्रेन्दुजीवारेषु शशिजस्य विशेषतः ॥१२२॥
भौमार्कदिवसे चैव तथा च शनिवासरे ।
कृषिकर्मसमारम्भो राज्योपद्रवमादिशेत् ॥१२३॥

1 D reads इत्थं लाङ्गलसामग्री पराशरमुनिस्मृता ।

2 B, D कर्षकैः for कृषकैः. B, D कृषिकर्मणि for सर्वकर्मसु. D समर्था for शुभदा ।

3 B ०युज्यमाना for ०युक्तमाना, सा for या. C अन्वदृढानुकाया वा for अदृढा···या ।

4 C कृषकाणां for कर्षकाले. D कृषिकाले ।

5 A हलप्रसारणकथनं ( D हलप्रसारकथनम् ) for हल···णम् ।

7 A, B ०हस्तेषु for ०हस्तासु, B हाल for हल ।

8 B कर्षकैः for कृषकैः ।

10 A तथापि ( B तथैव ) for तथा च ।

11 A, C राजोपद्रवं for राज्योपद्रवं. D समारम्भे for समारम्भो ।
After this line, C reads बुधबृहस्पतौ चन्द्रे शुक्रे चैव विशेषतः । प्रशस्तं हलकार्यं च चन्द्रयोगे शुभे दिने ॥ वृषे धनुषि मीने च कन्यामिथुनवृश्चिके । वाहयेत्तु बलीवर्दान्नत्वा पृथ्वीं पराशरम् ॥ कुषे पशुविनाशः कर्कटे जलजाद्-भयम् । सिंहे शस्यविनाशः स्यात् तुलायां न प( प्र ? ) रोहति ॥ मृगे शत्रुभयं विद्यात् कुम्भे चैव भयं भवेत् । तस्मादत्र प्रयत्नेन हलकर्माणि कारयेत् ।

दशम्येकादशी चैव द्वितीया पञ्चमी तथा ।
त्रयोदशी तृतीया च सप्तमी च शुभावहा ॥१२४॥
शस्यक्षयः प्रतिपदि द्वादश्यां वधबन्धनम् ।
बहुविघ्नकरी षष्ठी कुहूः कर्षकनाशिनी ॥१२५।
हन्त्यष्टमी बलीवर्दान्नवमी शस्यघातिनी ।
चतुर्थी कीटजननी पतिं हन्ति चतुर्दशी ॥१२६॥
वृषे मीने च कन्यायां युग्मे धनुषि वृश्चिके ।
एतेषु शुभलग्नेषु कुर्याद्धलप्रसारणम् ॥१२७॥
मेषलग्ने पशुं हन्यात् कर्कटे जलजाद्भयम् ।
सिंहे सर्पभयं चैव कुम्भे चौरभयं तथा ॥१२८॥
मकरे शस्यनाशः स्यात्तुलायां प्राणसंशयः ।
तस्माल्लग्नं प्रयत्नेन कृष्यारम्भे विचारयेत् ॥१२९॥

3 C ०क्षयं च प्रतिपत् द्वादशी for ०क्षयः...बन्धनम् ।

4 B कृषक for कर्षक ।

5 A बलीवर्द० for बलीवर्दान् ।

6 B सर्वं for पतिं. After this line, C reads संपूज्याग्निं द्विजं देवं कुर्याद्धलप्रसारणम् । कृष्णौ वृषौ हले श्लाघ्यौ रक्तौ वा कृष्णलोहितौ ॥ वृषो हलरुचिर्वर्ज्यश्छिन्नलाङ्गूलकर्णकः । सर्वशुक्लस्तथा वर्ज्यः कृषकैर्हलकर्मणि ॥ अथ पादौ तयोर्लिप्यौ नवनीतैर्घृतैरपि । उत्तराभिमुखो भूत्वा क्षीरेणार्घ्यं प्रदापयेत् ॥ हलप्रसारणं कार्यं नीरुग्भिरपि कर्षकैः । ततोऽपि चार्घ्यमादाय वासवाय निवेदयेत् ॥

8 B हाल for हल. D नित्य for शुभ ।

9 A हन्ति for हन्यात्. D जलजं for जलजात् ।

10 B चौरभयं for सर्पभयं, सर्पभयं for चौरभयं. D कुर्यात् for चैव, भवेत् for तथा ।

Note :—Lines 7-10 are read by C at a different place with many variations. See footnote 11 under V. 123.

11-12 The matter, stated in these lines, is found at a different place in C (See footnote 11 under V. 123).

शुभेऽर्के चन्द्रसंयुक्ते शुक्लयुग्मेन वाससा ।
स्नात्वा गन्धैश्च पुष्पैश्च पूजयित्वा यथाविधि ॥१३०॥
पृथिवीं ग्रहसंयुक्तां पृथुं चैव प्रजापतिम् ।
अग्नेः प्रदक्षिणं कृत्वा भूरि दत्त्वा च दक्षिणाम् ॥१३१॥
फालाग्रं स्वर्णसंयुक्तं कृत्वा च मधुलेपनम् ।
अह्नेः क्रोडे वामपार्श्वे कुर्याद्धलप्रसारणम् ॥१३२॥
स्मर्तव्यो वासवः शुक्रः पृथुरामः पराशरः ।
संपूज्याग्निं द्विजं देवं कुर्याद्धलप्रसारणम् ॥१३३॥

1 A निर्मल [ D स्रक् ( ? ) गन्ध ] for युग्मेन ।

2 B शुक्लपुष्पैश्च गन्धैश्च for स्नात्वा...पुष्पैश्च.
D गन्धैः सुधूपैश्च for गन्धैश्च पुष्पैश्च. This line, with विधानतः for यथाविधि, is attributed, in the *Jyotistattva* ( p. 687 ), to Devala.

3 B हल for ग्रह. D reads the line as पृथिवीं ग्रहसंयुक्तं पृथुं चैव प्रजापतिम् ।

4 A अग्निं ( D अग्नौ ) for अग्नेः ।

3-4 This verse, with पृथ्वीं च for पृथिवीं, पूजयित्वा for पृथुं चैव, अग्निं प्रदक्षिणीकृत्य दीयते भूरिदक्षिणा for line 6, has been taken by Raghunandana, in *Jyotistattva* (*Smṛti-tattva*, I, p. 687), from Devala.

5 A संसृष्टं कृत्वा मधुना च विलेपयेत् for स्वर्ण···लेपनम् ;
D संस्पृष्टं for संयुक्तं, कृत्वापि for कृत्वा च ।

6 A वाके श्वासे वहमाने ( D वामांसेन वहत्यादौ ) for अह्नेः...पार्श्वे ।
B हाल for हल ।

7 B व्यासः for शुक्रः.
D पृथुर्वेणुः (?) for पृथुरामः ।

8 B हाल for हल. This line is read by C with the first line of the following verse ( See under V. 126, footnote 6 ). This line, with प्रवर्तनम् for प्रसारणम्, is attributed, in the *Jyotistattva* (p. 687), to Devala.

कृष्णौ वृषौ हलश्लाघ्यौ रक्तौ वा कृष्णलोहितौ ।
मुखपार्श्वौ तयोर्लेप्यौ नवनीतैर्घृतेन वा ॥१३४॥
उत्तराभिमुखो भूत्वा क्षीरेणार्घ्यं निवेदयेत् ।
शुक्लपुष्पसमायुक्तं दधिक्षीरसमन्वितम् ॥१३५॥
सुवृष्टिं कुरु देवेश गृहाणार्घ्यं शचीपते ॥१३६॥
निविष्टो विष्टरे भक्तः संस्थाप्य जानुनी क्षितौ ।
प्रणमेद् वासवं देवं मन्त्रेणानेन कर्षकः ॥१३७॥

1 A मध्यमौ for रक्तौ वा. D हले for हल. In C, this line forms a verse with the last line of the preceding verse as its first line.

2 A मुखपार्श्वोवुभौ for मुख···तयोः. B श्लाप्यो for लेप्यो, नवन्या च for नवनीतैः, च for वा. D पार्श्वं for पार्श्वौ, लेह्यं ( लेप्यं ? ) for लेप्यौ, नवनीतं घृतं च वा for नवनीतै...वा ।

Note: Bet. lines 1 and 2, D adds प्रयत्नेन वृषानेतान् कृष्यारम्भे विचारयेत् ।

3 A ०मुखी for मुखो, प्रदापयेत् for निवेदयेत्. B इन्द्राय for क्षीरेण. D ऊर्ध्वं पूर्वमुखो for उत्तराभिमुखो ।

Attributed by Raghunandana, in *Jyotistattva* (*Smṛti-tattva*, I, p. 687), to Devala with प्रदापयेत for निवेदयेत् ।

Note: Bet. 2 and 3, D adds भग्नश्रृङ्गं वृषं दुष्टं खुरभग्नं तथैव च अवश्रृङ्गं समुत्क्षिप्तं (?) त्यक्त्वा सर्वप्रयत्नतः ।

4 A घृतान्वितं for समन्वितं ।

Note: Bet. 3 and 4, D adds हलपूजां ततः कुर्याद्वृषौ माल्येन वेष्टयेत् and A reads हलप्रसारणं कार्यं नीरुग्भिर्वृषकर्षकैः । वसुधे हेमगर्भासि शेषस्योपरिशायिनी । तव पृष्ठे कृषिं कुर्यां गृहाणार्घ्यं धरित्रि मे ॥ ततोऽर्घ्यमपरं दद्याद्वासवाय महात्मने !

6 A...भक्तया (?). C निवृष्टभूमिपृष्ठकरः for निविष्टो...भक्तः, जानुना for जानुनी. D omits the line.

7 Omitted by D.

निर्विघ्नां शस्यसम्पत्तिं कुरु देव नमोऽस्तुते ॥१३८॥
ततो दद्याच्च नैवेद्यं घृतपूर्णं प्रदीपकम् ।
शस्यसम्पत्तयेऽवश्यं सघनाय मरुत्वते ॥१३९॥
वसुधे हेमगर्भासि शेषस्योपरिशायिनी ।
चराचरधृते देवि देहि मे वाञ्छितं फलम् ॥१४०॥
वृषो व्यर्थकटिर्वर्ज्यश्छिन्नलांगूलकर्णकः ।
सर्वशुक्लस्तथा वर्ज्यः कृषकैर्हलकर्मणि ॥१४१॥
छिन्नरेखा न कर्तव्या यथा प्राह पराशरः ।
एका तिस्रस्तथा पञ्च हलरेखाः प्रकीर्तिताः ॥१४२॥

1 Omitted by B and D.
Note: Before this line A and C read हलप्रसारणारम्भे ( A हल-प्रसारणे कार्ये ) मेघैर्द्रोणादिभिर्युतः.

2-3 Omitted by B, D.

3-4 Bet. these lines, C reads—शक्रः सुरपतिश्चैव वज्रहस्तो महाबलः । शत-यज्ञाधिपो देवस्तस्मै इन्द्राय वै नमः ॥

4-5 Omitted by B, D.
Note: After line 8, C adds—उद्धृतासि वराहेण कृष्णेन शतबाहुना । तत्र पृष्ठे वसाम्येव गृहाणार्घ्यं धरित्री ( त्रि ? ) मे ॥

6 A महत् for व्यर्थ. Omitted by D.

7 Omitted by D. In place of V. 142, D reads—वर्जयेन्मारणाघातं छिन्नं लांगूलकर्णयोः । प्रहारं बहुवारं च वर्जयेद्धलकर्मणि ॥
Note: Bet. lines 2 and 3, B adds हलप्रसारणं कार्यं नौकृगभिर्वृषकृषकैः which line is read by A and C ( ऋषि for वृष ) in a different context ( See footnote 6, p. 59, and note after footnote 4, p. 62 ).
Bet. lines 4 and 5, D adds अत ऊर्ध्वं न कर्तव्या महान् दोषो भवेत्तदा ।

एका जयकरी रेखा तृतीया चार्थसिद्धिदा ।
पञ्चसंख्या तु या रेखा बहुशस्यप्रदायिनी ॥१४३॥

हलं प्रवहमाणं तु कूर्ममुत्पाटयेद् यदि ।
गृहिणी म्रियते तस्य तथा चाग्निभयं भवेत् ॥१४४॥

फालोत्पाटे च भग्ने च देशत्यागो भवेद्ध्रुवम् ।
लांगल' भिद्यते वापि प्रभुस्तत्र विनश्यति ॥१४५॥

ईषाभङ्गो भवेद्वापि कृषकप्राणनाशकः ।
भ्रातृनाशो युगे भग्ने शौले च म्रियते सुतः ॥१४६॥

1 A या सुसिद्धिदा for चार्थ...दा. D चार्थकरी for जयकरी.

2 B पञ्चमाख्या for पञ्चसंख्या. D मुख्या पञ्च महारेखा for पञ्च...रेखा.

